M. T. B. COLLEGE, SURAT
Manuscripts Library
No. Ref.
Ser. 1531
Title: Tithi Nirnaya

1531

In Complete

C

Tithi	Nirnaya	Title
		Author
		Editor
		Year, Vols.
SK		Publisher
1531		Remarks

षमावास्यातिथ्योर्युग्मंमहाफलं ॥ एतद्व्यस्तंमहाघोरंहंतिपुण्यंपुराकृतं ॥ युग्मंद्वितीयाम
ग्निस्तृतीया ॥ युग्मंमूलपदंमुनि ७ वसु ८ रंध्र ९ रुद्र ११ तथा ॥ शुक्लपक्षेतिथिर्ग्राह्याय
स्यामभ्युदितोरविः ॥ कृष्णपक्षेतिथिर्ग्राह्यायस्यामस्तमितोरविः ॥ वेधमाह ॥ सामान्यतः
सर्वतिथीनांत्रिमुहूर्त्तात्मकोवेधःज्ञेयः ॥ विशेषस्तु ॥ नागोद्वादशनाडीभिर्दिक्पंचदशभिस्त
था ॥ भूतोष्टादशनाडीभिर्दूषयत्युत्तरांतिथिं ॥ एवंनिद्यतिथेर्वेधंसजेत ॥ कर्मणोयस्ययःका
लस्तत्कालव्यापिनीतिथिः ॥ तयाकर्माणिकुर्वीतह्रासवृद्धीनकारणं ॥ सर्वापेक्षयाकर्मश
स्वबलवत्तरं ॥ अथव्रतस्वीकरोद्यापनादौसंपूर्णतिथिलक्षणमुच्यते ॥ सूर्योदयमा
रभ्यखमध्यपर्यंतमाद्यंकेषांचिन्मतं ॥ सूर्योदयमारभ्यअस्तमयपर्यंतमाद्यंदिवाव्रते ॥
रात्रिव्रतेतुसूर्योदयमारभ्यरात्रिकाळव्यापिनीसंपूर्णाज्ञेया ॥ प्रतिवार्षिकव्रतेतुपूर्णैव
पेक्षते ॥ किंतुपूर्णाभवतुखंडावा ॥ तत्रप्रतिपच्छुक्लाऽपराह्णिकीचेत्पूर्वा ॥ शुक्लास्यात्प्रतिप
त्तिथिः प्रथमतश्चेत्तापराह्णमवेदिति ॥ काळनिर्णय[illegible]वचनात् ॥ अपराह्णेशुक्लप्रतिप
त्सर्ववृद्धिह्रासाभावार्थेत्यर्थः ॥ अन्यथोत्तरा ॥ कृष्णाप्रतिपत्सर्वापूर्वैव ॥ प्रतिपत्तद्वितीयास्यादिति
वचनात् ॥ ॥ इतिसामान्यनिर्णयः ॥ ॥ अथविशेषनिर्णयउच्यते ॥ ॥ तत्रादौचैत्रप्रतिपदि

श्विने विप्रादिना अंतरितेन वरात्रं कार्यं॥ अत्र तिथिनिर्णयः॥ वक्ष्यमाणनवरात्रव कार्यः।
तिथिपक्षे राजन्निर्णयार्थं सूर्योदयव्यापिनी ग्राह्या॥ दिनद्वये पूर्वैव ग्राह्या॥ दिन
क्षये तु निर्दिन एव ग्राह्या॥ प्रतिपदि॥ तत्र यद्यहद्वये वृद्धौ तद्यभावस्तिथिक्षये॥ उद
यद्वितये पूर्वोक्षिये तेदिन एव च॥ ज्योतिर्निबंधे॥ अत्रैवाभ्यंगः कार्यः उक्तं च॥ आकर्ण्यंवि
किरालेचवलं तस्य च दर्शने॥ तैलाभ्यंगमकुर्वाणो नरकं प्रतिगच्छति॥ अथ ज्येष्ठशुक्ल
प्रतिपद्दशहराव्रतारंभः॥ कार्यः॥ अत्र पूर्वाह्णव्यापिनी तिथिर्ग्राह्या॥ दशम्यां समाप्तिः
इदं व्रतं दशदिनसाध्यं॥ आश्विनशुक्लप्रतिपदि नवरात्रारंभः कार्यः॥ नवरात्रप्रतिपच्छुक्ल
त्वाद्यसहिका चेत्पूर्वविद्धैव॥ उत्तरविद्धा वैधृतिनिवृत्तिमूलकानि॥ तथा॥ नवम्यां वर्तमा
ने ग्राह्या॥ पूर्वतः परतोपि वा॥ तथैव स्नातिपक्षाभ्यां नवदुर्गार्चनं यदा॥ विधिना नवदुर्गास्तु
कमान्तितिप्रदादयः॥ तिथिप्रावर्तनाद्येषु नवम्यां तेषु पूजयेत्॥ वृद्धौ समाप्तिरष्टम्यां क्ष
ये माप्रतिपन्निशि॥ आरंभो नव वंश्या श्वसुदेवकुसयुक्तः॥ आरंभः प्रतिपद्यत्र नवनाड्यस्ति
थिक्षये॥ स्याद्दर्शप्रतिपद्यत्रौ समाप्तिर्नवमेहनि॥ वृद्धौ समाप्तिरष्टम्यां क्षये मा प्रतिपन्नि

शि॥ अथ स्तनाडिकास्त्वन्का षोडशाहदेशापि वा॥ अपराह्णे प्रकर्तव्यं सुखवृसं
तति कोक्षितिः॥ नवरात्रव्रते आश्विनशुक्ले प्रतिपदि चित्रावैधृतिरहितायां षदप्रतिष्ठा
षोडशतद्दिनस्याः पराह्णव्यापिनी तिथिर्ग्राह्या॥ तत्र चित्रावैधृतियोगे आद्याः षोडश
द्वादशवा नाड्यस्त्याज्याः॥ अत्रैव नवरात्रिमध्ये दिनक्षये सति अमायुक्ते प्रतिपन्नि
शि आरंभः कार्यः॥ वृद्धौ अष्टमीयुक्ते नवम्यां समाप्तिः॥ होमोत्तरदिने पारणा का
र्या॥ अपराह्णे प्रशस्त्याभावात्का कालरे घटस्थापनं कार्यं॥ ॥ अथ कार्तिकशु
तिप्रतिपद्बलिक्रीडादौ पूर्वविद्धैव॥ पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बले दिनमिति वचना
त॥ चंद्रदर्शने तु द्वितीयायुतैव॥ वर्धमानतिथौ नंदा यदा स्यात्सार्धयामिका॥
द्वितीया वृद्धिगामित्वादुत्तरा तत्र चोतीर्यते॥ त्रियामिका दर्शतिथिर्भवेत्सार्ध
त्रियामा प्रतिपद्वृद्धौ॥ दीपोत्सवे तेमुनिभिः ... अन्यथा पूर्वविद्धा विधेये॥
इति तिथिनिर्णयामृते तत्र वचनात्॥ बलिपूजायां प्रदोषव्यापिनी पूर्वविद्धैव प्रति
पद्ग्राह्या॥ दिनद्वये प्रदोषव्यापिनी प्रतिपद्दिनद्वये वा प्रदोषव्यापिनी नास्ति
यदा दिनद्वये प्रदोषैकदेशव्यापिनी अस्ति तदा पूर्वविद्धैव प्रतिपद्ग्राह्या॥ तत्र

स्मृतिः॥ श्रावणी दुर्गानवमी दूर्वा चैव हुताशिनी॥ पूर्वविद्धैव कर्त्तव्या शिवरा
त्रिर्बलेर्दिनं॥ यदा एकस्मिन्दिने प्रदोषव्यापिनी तदा सैव ग्राह्या॥ धर्मप्र
दीपे॥ तत्र बलिं प्रति त्रिविक्रमवरप्रदानान्न प्रदोषपूज्या॥ ॥ अथ ना
रीनीराजनं॥ ॥ नीराजने बलिप्रतिपत् पूर्वाह्णव्यापिनी ग्राह्या॥ सा च
अभ्यंगनीराजनपर्याप्तासंगवव्यापिनी परविद्धा ग्राह्या॥ उक्तं च॥ वत्संता
दौ वत्सराद्दौ बलिराज्ये तथैव च॥ प्रतिपत्पूर्वविद्धा नो कर्त्तव्या न कदाचन॥
३७ यद्दिस्युः संगवाद्दर्वाकू एतास्विति थियस्त्रयः॥ दीपदानादिकार्येषु कर्त्तव्याः पूर्व
संयुताः॥ एवं संगवात्प्राक् प्राप्ता प्रतिपत् पूर्वा ग्राह्या॥ संगवे प्राप्ता परैवेत्युक्तं॥
उक्तं च॥ अथ चेत्प्रतिपत्स्वल्पा द्वितीया सकला यदि॥ नारीनीराजनं प्रातः सायं मं
गलमालिका॥ मंगलमालिका नाम दीपमालिका॥ तत्र स्वल्पापि द्वित्रा या वदन्ति
मीतावमेन्नारीनीराजनं न कुर्यात्॥ प्रतिपद्द्विप्राप्तायां कुर्यात्॥ तत्र वसिष्ठः॥ मुहू
र्त्तवर्त्ततेद्दर्शे मांगल्यं तत्र चेद्भवेत्॥ पुत्रपस्यकलत्राणि तस्य वै नश्यति ध्रुवं॥ त

त्रैव विद्धायां युक्तायां प्रतिपदि नीराजनं न कार्यं॥ कार्त्तिकस्यसिते पक्षे नस्तत्रं च द्विदैवतं॥
नीराजनं न कुर्वीत प्रतिपद्याहगोतमः॥ नंदायामुदये भ्यं गं कृत्वा नीराजनं ततः॥ सुवेशाय लक्ष्
थागीतैर्दीनै श्वदिवसं नयेत्॥ ॥ इति बलिराजप्रतिपन्निर्णयः॥ ॥ अथ फाल्गुनकृष्णप्र
तिपदि भस्मवेदनादिकार्ये अस्य निर्णयः॥ द्वितीया कृष्णा॥ उपवासादौ पूर्वाह्णव्यापिनी पू
र्वा ग्राह्या॥ शुक्लाः पूर्वाह्णगाः अन्या वा परैवः स्यात्॥ मार्गशीर्षे शुक्ले प्रथमे चंद्रदर्शनवत्यां
द्वितीयां बलचंद्रं अलंकार्यं॥ चंद्रदर्शनेव कर्मकालः॥ अत्र यो विधिर्यथा नरात्सद्वेयः॥
॥ ॥ इति द्वितीयानिर्णयः॥ ॥ अथ तृतीयानिर्णयः॥ ॥ चैत्रशुक्लतृतीयायां आंदोलनं गौर्याः
रूपतं॥ वैशाखशुक्लतृतीयायां अक्षदोलनं गौर्या उद्यापनं॥ भाद्रशुक्लतृतीयायां हरितालि
का॥ गौरीव्रतअन्यावात्तृतीया॥ एतासां च तसृणां तृतीयायां नांषकृतं त्रेणनिर्णयः॥ तृती
या तु रंभाव्रतव्यतिरिक्तविषये चतुर्थीयुक्ता॥ रंभाख्यं वर्जयित्वा तु तृतीया द्विजसत्तम॥
अन्येषु सर्वकार्येषु गणयुक्ता प्रशस्यते॥ इति कालनिर्णयदीपिकावचनात्॥ द्वितीयायु
क्ततृतीयाप्रतिपादकवचनानि तु रंभाव्रतविषयाणि॥ अतश्च॥ द्वितीयानुषसंयुक्तां याक

४

रोति विहीनता ॥ सा वैधव्यमवाप्नोति प्रवदंति मनीषिणः ॥ चतुर्थीसहियुता या तु
सा तृतीया फलप्रदा ॥ अवैधव्यकरी स्त्रीणां पुत्रपौत्रप्रवर्द्धिनी ॥ तिथिनिर्णयामृत
वचनात् ॥ चैत्रशुक्लतृतीया वैशाखशुक्लतृतीया भाद्रपदशुद्धतृतीयश्चान्या वा गौरीव्रते
चतुर्थीयुतैवश्रौत्यिकी ॥ त्रिमुहूर्त्तव्यापिनी ग्राह्या ॥ यदा पूर्वदिने मुहूर्त्ताधिका द्वितीया
अस्ति परदिने मुहूर्त्तत्रयात् ॥ न्यूना अस्ति तदा लघुमाधवे मुहूर्त्तमात्रसत्वेपि दिने गौ
रीव्रतं चरेत् ॥ यद्यपि त्रिमुहूर्त्तत्रय विना तिथिर्ग्राह्या उक्तं नास्ति तथापि गौरीव्रते मुहूर्त्तमात्र
वर्त्तिन्यपि परा तिथिर्ग्राह्या ॥ परदिने मुहूर्त्तान्न्यूना तृतीया तदा पूर्वा ग्राह्या ॥ वैशाखशु
द्धतृतीया सैवाक्षततृतीया श्राद्धादौ अपराह्णव्यापिनी ग्राह्या ॥ इयमेव युगादिः ॥ शुक्ला
पूर्वाह्णव्यापिनी ग्राह्या इयमेव परशुरामजयंती ॥ इयं सूर्योदयव्यापिनी ग्राह्या ॥ उक्तंच
रेणुकामहात्म्ये ॥ ततः क्व विधि नक्षत्रे तृतीयायां तु माधवे ॥ रेणुकायास्तदा गर्भादुद्भिनश्च
हरिर्विभो ॥ केचित्तु ॥ प्रातः प्रातस्तु मध्याह्ने सायं तथा निशि ॥ मध्याह्ने मध्यरात्रे च सायंप्रा
तरनुक्रमात् ॥ प्रातः दृ॰ जयंती कर्मकालः ॥ परशुरामवामनयोरेवपक्षांतरं ॥ मत्स्यः कू

र्मेति ॥ आषाढाद्यद्वितीयो वा न भोत्स्यहतु गुणो भाद्रपद्यां घ्राणः कर्मा वैशाखवाधमनुर्नभस्य
जसितेनृसिंहो वैशाखादिमः ॥ चैत्रां घंक न भोत्स्य बरुः पौषादि समम्यथो माघाद्यस्त्रिक दूत्यु
त्राव्य निमीषादीनां जयंतीरिमाः ॥ श्रावणकृष्णतृतीया कूर्मजयंतीयं प्रातःकालव्यापिनी
ग्राह्या ॥ केचित्तु श्रावणशुक्लतृतीयायां कूर्मजयंतीमाहुः माघशुद्धतृतीया कल्किजयंती
इयमपि प्रातःकालव्यापिनी ग्राह्या ॥ ज्येष्ठशुद्धतृतीयायां रंभाव्रतं कार्यं ॥ इयं द्वितीयायु
ता ग्राह्या ॥ ॥ इति तृतीयानिर्णयः ॥ ॥ अथ चतुर्थीनिर्णयः ॥ ॥ सर्वमासस्थशुक्लच
तुर्थी एकभक्तोपोषणे गणेशपूजाने दोमध्याह्नव्यापिनी ग्राह्या ॥ कृष्णा अपि ॥ चतुर्थी तु
परा पोष्या गणनाथव्रतस्य तु ॥ मध्याह्नव्यापिनी पूज्या इति ॥ अथ चतुर्थीविनायकव्रतव्य
तिरिक्तविषये पंचमीविद्धा ग्राह्या ॥ विनायकव्रतं हित्वा तु चतुर्थी परेति कालनिर्णयदीपि
कावचनात् ॥ विनायकव्रते तु तृतीयायुक्ता चतुर्थी ॥ इमानि तृतीयायुक्तचतुर्थी प्रतिपादका
नि तानि सार्वाणि संकष्टचतुर्थीव्रतविषयकाणि ॥ संकष्टचतुर्थी चंद्रोदयव्यापिनी ग्राह्या
एकस्मिन्नेव चंद्रोदयव्यापिनी सैव ग्राह्या ॥ दिनद्वयेपि चंद्रोदयव्यापिनी चेत्तदा परा दिन
द्वयेपि चंद्रोदयव्यापिनी नास्ति तदापि परैव ॥ ॥ इति चतुर्थीनिर्णयः ॥ ॥ अथ पंचमीनि

५

र्णयः॥ ॥पंचमी कृष्णा पूर्वविद्धा शुक्ला परविद्धा॥ कृष्णा पूर्वयुता सितापरयुता स्यात्पंच
मीति कालनिर्णयदीपिकावचनात्॥ यदा तु उपवासव्यतिरिक्तव्रते सर्वा पंचम्युत्तरविद्धै
व॥ विद्धान्येव विनोपवासव्रते तु पूर्वविद्धैव॥ एकादशी तथाष्टमी अमावास्या चतुर्थि
का॥ उपोष्यपरयुक्ता स्यात्पराः पूर्वेण संयुताः॥ इति हेमाद्रौ च॥ सर्वत्र पंचमी ग्राह्या पूर्वा
स्कंदव्रते परा॥ श्रावणशुद्धपंचम्यां नागपंचमीव्रतं कार्यं॥ इयं द्विधा भक्तस्येव दिनमा
नस्य पूर्वाह्णव्यापिनी ग्राह्या॥ अनुमानतो निर्णयः॥ माधवेन मध्याह्नकालव्यापिनी
ग्राह्या॥ भाद्रपदशुद्धपंचम्यां ऋषिपंचमीव्रतं कार्यं॥ इयं मध्याह्नव्यापिनी ग्राह्या॥ उक्तं च व्र
तखंडे॥ मध्याह्ने पूजयेदृषीनिति॥ अत्रैव वनराहजयंती इयं मध्याह्नव्यापिनी ग्राह्या॥
आश्विनशुद्धपंचम्यां उपांगललिताव्रतं कार्यं॥ इयं द्विधा कृतदिनापराह्णव्यापिनी ग्रा
ह्या॥ ॥इति पंचमीनिर्णयः॥ ॥अथ षष्ठीनिर्णयः॥ ॥षष्ठी तु नरविद्धैवा षष्ठी तु शस्ता
त्तरेति कालनिर्णयदीपिका॥ नागविद्धा न कर्तव्या षष्ठी चैव कदाचन॥ सप्तमी संयुता
कार्या षष्ठी धर्मार्थवित्तकैरित्यादि हेमाद्रौ स्कंदपुराणात्॥ अत्र च पंचमीवेधो द्वादश ना
डीभिः संपद्यते॥ ततो न्यूनवेधे पंचम्या वेधदोषो नास्ति॥ श्रावणशुद्धषष्ठी वरान्नषष्ठी पंच

क्ते दिन मध्याह्नव्यापिनी ग्राह्या॥ भाद्रपदकृष्णषष्ठी कपिलाषष्ठीयं योगजा॥ उक्तं च नि
र्णयामृते॥ भाद्रमासे सिते पक्षे भानौ चैव करे स्थिते॥ पाते कुजे च रोहिण्यां सा षष्ठी कपिला
स्मृता॥ अत्र विधिः॥ व्रतोपवासनियमैर्भास्करं तत्र पूजयेत्॥ कपिलां च द्विजे दद्याद
त्राक्रतुफलं भवेत्॥ इति॥ ॥इति षष्ठीनिर्णयः॥ ॥अथ सप्तमीनिर्णयः॥ ॥अथ सप्तमी
पूर्वविद्धा ग्राह्या॥ पूर्वस्यादिह सप्तमी॥ इति वचनात्॥ हेमाद्रौ भविष्योत्तरपुराणे॥ षष्ठी च सप्तमी
तात तेन्योन्यसमाश्रिते इति वचनात्॥ युग्मवाक्यषण्मुन्योरिति वचनात्॥ लघुमाधवे॥ स
प्तमी पूर्वविद्धैव व्रतेषु निखिलेष्वपि॥ अभावे पूर्वविद्धाया परविद्धापि गृह्यते॥ श्रावणशुद्धस
प्तमी शीतलासप्तमीत्युच्यते॥ इयं भोजनप्राधान्यत्वाद्विधा तु तद्दिने मध्याह्नव्यापिनी ग्राह्या॥
पौषशुद्धसप्तमी बौद्धजयंती यं सायंकालव्यापिनी ग्राह्या॥ माघशुद्धसप्तमी रथसप्तमी
त्युच्यते॥ अस्यामरुणोदयव्यापिन्यां स्नात्वा सूर्यायार्घ्यं दद्यात्॥ उक्तं च निर्णयामृते स्मृति
चंद्रिकायां॥ सूर्यग्रहणतुल्या तु शुक्ला माघस्य सप्तमी॥ अरुणोदयवेलायां तत्र स्नानं म
हाफलं॥ ॥इति सप्तमीनिर्णयः॥ ॥अथाष्टमीनिर्णयः॥ ॥अष्टमी नवमीयुता

ग्राह्या॥ वस्वरंध्रयोरिति युग्मवाक्यत्वात् शुक्लेवा। कृष्णे। पूर्वविद्धैव॥ परयुक्तशुक्लाष्टमी पू
र्वयुक्ता कृष्णेति कालनिर्णयदीपिका॥ शुक्लपक्षेष्टमी चैव शुक्लपक्षे चतुर्दशी॥ पूर्वविद्धा न क
र्तव्या कर्तव्या परसंयुता॥ कृष्णपक्षेष्टमी चैव कृष्णपक्षे चतुर्दशी॥ पूर्वविद्धैव कर्तव्या परविद्धा
न कुत्रचित्॥ इति हेमाद्रौ निगमवचनात्॥ उमामहेश्वरपूजा तु कृष्णाष्टम्यामपि नवमीयुता
यामेव कार्या॥ हेमाद्रौ पद्मपुराणेच॥ अष्टमी नवमीयुक्ता नवमी चाष्टमी युता॥ अर्धना
रीश्वरी प्राया उमामहेश्वरी तिथिः॥ रिति वचनात्॥ ॥ अथ दुर्वाष्टमी॥ ॥ भाद्रपदे शुक्लाद्
र्वाष्टमी पूर्वा दूर्वा विद्धैव ग्राह्या॥ श्रावणी गुदुर्गनवमी दुर्वा चैव हुताशनी॥ पूर्वविद्धा प्र
कर्तव्या शिवरात्रिर्बलेर्दिनं॥ इति॥ इयं दुर्वाष्टमी सिंहस्थे अनुदिते अगस्त्ये सति भाद्र
पदशुक्लाष्टम्यां ज्येष्ठामूलनक्षत्ररहितायां पूर्वविद्धायां मध्याह्नादुपरि रोहिणीमुहू
र्ते दूर्वां पूजयेत्॥ रोहिणो नवमो मुहूर्तः॥ पूर्वस्यां ज्येष्ठामूलयुक्तायां सत्यां परस्यामपि
रोहिणीमुहूर्तव्यापिन्या कार्या॥ दूर्वापर्वणि अग्निपक्वं न भोक्तव्यं॥ कन्यार्के अगस्त्योद
ये ज्येष्ठामूलर्क्षव्रताकरणे महादोषः॥ तदा किं कार्यं॥ यदा मुनाज्येष्ठादे विरहो न संभव

ति तदा दूर्वामभ्यर्च्यैकभक्तं कर्तव्यं॥ इति दुर्वाष्टमीनिर्णयः॥ ॥ अथ ज्येष्ठादेवीनिर्णयः॥
भाद्रपदशुक्लाष्टम्येव ज्येष्ठानक्षत्रसंयुता केवला वा ज्येष्ठा ज्येष्ठाष्टमी त्युच्यते॥ तत्र ज्ये
३ष्ठादेवीं पूजयेत्॥ तत्र प्रतिवर्षं क्रियमाणं ज्येष्ठाव्रतं नक्षत्राभावेपि तिथावेव कार्यं॥ तत्र प्र
तिमासं क्रियमाणं ज्येष्ठाव्रतं यस्या कस्यां चित्तिथौ ज्येष्ठानक्षत्र एव कार्यं॥ निर्णयामृ
ते मत्स्यपुराणे॥ प्रत्याब्दिकं तिथावुक्तं यज्ज्येष्ठादेवलं व्रतं॥ प्रतिज्येष्ठाव्रतं यत्र विहितं के
वलोडुनि॥ तिथावेवाचरेदाद्यं द्वितीयं केवलर्क्षतः॥ एतच्च तद्दिनत्रयसाध्यं॥ तद्यथा॥ स
प्तम्यां सायंकाले ज्येष्ठामावाहयेत्॥ रात्रिव्यापिन्यामष्टम्यां रात्रौ प्रपूजयेत्॥ नवम्यां सा
तदीनादिकृत्वा सायं विसर्जयेत्॥ उक्तं च॥ रात्रौ पूजादिकं कुर्यात्प्रातर्दानादिकं तथा॥ इ
ति प्रतिवार्षिकव्रते विष्ण्यादिने वर्जितयेत्॥ ॥ इति ज्येष्ठादेवीनिर्णयः॥ ॥ आश्विनशुद्धाष्ट
मी महानवमी त्युच्यते॥ तत्र कालो नापेक्षितः॥ नवमीयुतायामष्टम्यां होमादि कार्यं॥ उ
क्तं च॥ वृद्धौ समाप्तिरिति॥ वृद्धिरभावे नवम्यामेव होमादि कार्यं॥ तदुक्तं॥ नवम्यां वर्तये
त्वा होमिति॥ ॥ आश्विनशुद्धाष्टमीनिर्णयः॥ ॥ अथ जन्माष्टमीव्रतनिर्णयः क्रियते॥ भय

७ स्मिन्दिने निशीथे वर्त्तमानाष्टमी नरोहिणीयुक्ता भवतु सैवोपोष्या ॥ दिनद्वये अष्टम्यां नि
शीथे सत्वे पूर्वेद्युरेव रोहिणीयोगवती पूर्वैवोपोष्या ॥ दिनद्वये रोहिणीयोगवती निशी
थे योगवत्येव यावत्सैव ग्राह्या ॥ चेन्निशीथयोगवती न भवति तदापरैव ॥ दिनद्वयेपि
निशीथे अष्टमी नास्ति तदापरैव ॥ प्रातः संकल्पकाले सत्वात् ॥ अत्र निशीथं ज्यो
तिःशास्त्रोक्तं विंशतिपलात्मकं ॥ ॥ अथ पारणानिर्णयः ॥ तिथिनक्षत्रयोरंते पा
रणमुत्तमं ॥ अन्यतरसमाप्तौ मध्यमं ॥ भगवत्पूजांते कर्त्तव्यमिति अत्रान्त्यपक्षः कनीया
न् ॥ इति अष्टमीनिर्णयः ॥ ॥ अथ नवमीनिर्णयः ॥ ॥ नवमी अष्टमीयुतैव ग्राह्या ॥ वसुरंध्रयो
रिति युग्मवाक्यात् ॥ पूर्वास्यान्नवमी शुभेति वचनात् ॥ न कुर्यान्नवमीं तात दशम्यां तु कदा
चनेति स्कंदपुराणे निषेधत् ॥ चैत्रशुद्धनवमी रामनवमी जयंतीव्रते मध्याह्नव्यापिनी ग्राह्या ॥
उक्तं च जातकसारे ॥ श्रीरामश्चैत्रमासे दिनदळे समयेति ॥ भाद्रपदनवमी अदुःखनवमी
व्रते व्रतखंडोक्तकर्मकालव्यापिनी ग्राह्या ॥ गुरुसंप्रदायेन मध्याह्नकालव्यापिनी ग्रा
ह्या ॥ आश्विनशुद्धनवमी महानवमी इयं नवरात्रव्रतांग होमादौ आवर्त्तनव्यापिनी ग्रा
ह्या ॥ उक्तं च ॥ नवम्यां वर्त्तते ग्राह्येति ॥ ॥ इति महानवमीनिर्णयः ॥ ॥ अथ दशमी

निर्णयः ॥ ॥ ज्येष्ठशुद्धनवमी दशहराव्रते ॥ आश्विनशुद्धनवमी विजयादशमीत्युच्य
ते ॥ इयं विजयमुहूर्त्तप्रदोषव्यापिनी ग्राह्या ॥ नवमीयुता श्रवणेनापि युता ॥ असंभवे के
वला सायंप्रदोषव्यापिनी ग्राह्या ॥ ऐशान्यां उदीच्यां दिशि वा प्रस्थानं ॥ शमीपूजा च कार्या ॥
उक्तं च ज्योतिर्निबंधे विश्वरूपनिबंधे ॥ आश्विनस्य सिते पक्षे दशमी मातिक्रमणोत्सव ॥ विज
याय मुहूर्तो यः कर्तव्यो विजयक्षणे ॥ नवम्या सहिता कार्या दशम्याश्वयुजः सिता ॥ एकादश्यां तु
ता जातु न कार्या जयकांक्षिभिः ॥ पुराणे च ॥ नवमीसंयुतायां च दशम्यां विजयोत्सवः ॥ कुरु
राम त्वमित्युक्तं वसिष्ठेन महात्मना ॥ कालोत्तरे ॥ या पूर्णा नवमीयुक्ता तस्यां पूजापराजिता ॥
ददाति विजयं सौख्यं यात्रायां सर्वदिक्षु च ॥ आश्विनस्य सिते पक्षे दशम्यां सर्वराशिषु ॥ सा
यंकाले शुभा यात्रा दिवा वा जयक्षणे ॥ चिंतामणौ ॥ आश्विनस्य सिते पक्षे दशम्यां तार
कोदये ॥ स कालो विजयो ज्ञेयः सर्वकामार्थसिद्धये ॥ रत्नकोशे ॥ ईषत्संध्यामतिक्रांतः किंचि
दुद्भिन्नतारकः ॥ विजयो नाम कालोयं सर्वकामार्थसिद्धये ॥ ॥ इति विजयादशमीनिर्णयः ॥
अथैकादशीनिर्णयः ॥ एकादशी द्विविधा ॥ शुद्धा विद्धा च ॥ आ त्वारुणोदयवेधः वैष्णववि
षयकः ॥ सूर्योदयवेधः स्मार्त्तविषयकः ॥ चतस्रो घटिकाः प्रातररुणोदय उच्यते ॥ अत्र आ

र्यपक्षेणनिर्णयः॥ उक्तं च॥ सर्वधर्मेषुकः श्रेयान्विष्णुधर्मेषुयोधिकइति॥ अरुणोद
यवेधंपरित्यज्यवेधवैरेकादशीव्रतंकार्यं॥ उक्तं च॥ दशमीशेषसंयुक्तो यदिस्यादरुणोदयः।
वेधवैर्नतुकर्तव्यंदंतद्दिनेकादशीव्रतं॥ द्वादश्याधिक्येतुस्मार्तैर्वैष्णवैःपरेवोपोष्या॥ न्यून
द्वादशीकापक्षेतुस्मार्तैः पूर्वावैष्णवैः पराउपोष्या॥ अरुणोदयवेधा११भावेद्वादश्याधिक्या
भावेचसर्वैरेकैवोपोष्या॥ पारणादिनेसूर्योदयानंतरं एकादशीदृश्यते चेत्तत्स्मार्त्ती
तिरिक्तमुच्यते॥ तत्रापिउपावासः इतिसायंप्रदायशुद्धायांत्रयोदश्यांस्मार्तैःकुर्यात॥
ज्येष्ठशुद्धएकादशीनिर्जळी॥ ॥इतिएकादशीनिर्णयः॥ ॥अथद्वादशीनिर्णयः।
द्वादशीपूर्वविद्धोपवासादौद्वादश्याघयुतेति॥ कांकनिर्णयदीपिका॥ रुद्रेणद्वाद
शीयुक्तेतियुग्मवाक्यात्।एकादशीव्रतांगेतुद्वादश्याः प्रथमपादोहरिवासरइत्यु
च्यते॥ तंपरित्यज्यपारणाकार्या॥ श्रावणद्वादशी॥ मध्याह्नवर्तमानाश्रवणयुक्ता
ग्राह्या॥ एकादशीयुतात्रयोदशीयुतावाभवतु॥ एकादशीद्वादशीचेद्वैष्णव्यमपिचे
द्भवेत॥ तद्विष्णुशृंखलंनामविष्णुसायुज्यकृद्भवेत॥ तथाचभागवतेष्टमस्कंधेकर्मकाळ
वाक्यं॥ मध्याह्नसवितातिष्ठदितिपारणानिर्णयः॥ श्रवणद्वादशीयमेववामनजयंती॥

इतिद्वादशीनिर्णयः॥ ॥अथत्रयोदशीनिर्णयः॥ ॥त्रयोदशीशुक्लापूर्वविद्धाकृष्णापरविद्धा॥
कृष्णत्रयोदश्याः परदिने अभावेपूर्वविद्धैव॥ अस्याएवगजछायेतिवंनिर्णयामृते॥ यदेंदुःपि
तृदैवत्यहंसश्चैवकरेस्थितः॥ तिथिर्वैश्रवणीनाम गजछायेतिसास्मृता॥ तथाचरत्न
मालायां॥ कृष्णपक्षेत्रयोदश्यामिति॥ ॥इतिगजछाया॥ ॥द्वादश्यांशनिवारेप्रदोसम
येयात्रयोदशीसाशनिप्रदोषउच्यते॥ तत्रशिवपूजाप्रदक्षिणाकार्या॥ इति॥ शनिवार
प्रदोषः॥ अथचतुर्दशीनिर्णीयते॥ ॥शुक्लाकृष्णाच अपराह्णव्यापिनीपूर्वविद्धैवग्राह्या।
अपराह्णव्याप्त्यभावेचैत्रश्रावणव्यतिरिक्ताशुक्लाचतुर्दशीउत्तराकृष्णापूर्वविद्धा॥ चैत्र
श्रावणमासस्यशुक्लायाचचतुर्दशी॥ सारात्रिव्यापिनीग्राह्यानान्याशुक्लाकदाचन॥
वैकुंठशुक्लचतुर्दशीसूर्यास्तमयकाळव्यापिनीग्राह्या॥ उक्तं च॥ पूर्वाह्णदैविकंकार्य
मिति॥ भाद्रपदशुक्लचतुर्दशीऔदयिकीमुहूर्तव्यापिनीअनंतव्रतेग्राह्या॥ आश्वि
नकृष्णचतुर्दशीचंद्रोदयव्यापिनीनरकचतुर्दशीमहोत्सवांगअभ्यंगेग्राह्या॥
यदाचतुर्दशीदिनद्वयेपिचंद्रोदये अस्तिनास्तिवापक्षद्वयेपिपूर्वैव॥ त्रयोदशीयदाप्र

तः॥ स्वयं कार्त्तिचतुर्दशी॥ रात्रिशेषे तमावास्यायां तदभ्यंगे त्रयोदशी॥ ॥इति दीपाव
लीनिर्णयः॥ कार्त्तिकशुक्लचतुर्दशी वैकुंठचतुर्दशीत्युच्यते॥ इयमपराह्णव्यापिनी
परा ग्राह्या॥ माघकृष्णचतुर्दशी शिवरात्रिव्रतं॥ लघुमाधवोक्तं सर्वैर्गृह्यते॥ तदेवो
च्यते॥ प्रदोषे च निशीथे वा द्वयोर्वा यास्ति सा भवेत्॥ शिवरात्रिव्रते तत्र द्वयोः सत्ता
प्रशस्यते॥ तदभावे निशीथेन व्याप्तापि परिगृह्यतां॥ तस्याश्चासंभवे ग्राह्या॥
प्रदोषव्यापिनी तिथिरिति॥ उभयव्याप्तिरुत्तमा॥ निशीथव्याप्तिर्मध्यमा॥ प्रदोष
व्याप्तिरधमा॥ पारणेषु कन्यायं श्रतदिति॥ तिथ्यंते पारणं यामत्रयादर्वाक् समाप्यते॥
अन्यथा पारणं प्रातरन्यतिथ्युपवासवदिति॥ ॥इति चतुर्दशीनिर्णयः॥ ॥अथ पौर्णि
मानिर्णयः॥ ॥अथ पंचदशी सावित्रीव्रतव्यतिरिक्तव्रतविषये परविद्धैव॥ सावित्री
व्रतमंतरेण भवतो भूपौर्णमास्योपर इति कालनिर्णयदीपिका॥ भूतविद्धे न कर्त्तव्यं द
र्शपूर्णे कदाचन॥ वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमित्यवचनात्॥ विधलक्षणं दीपिका
विवरणे॥ नागो द्वादशनाडीभिर्दिक् पंचदशभिस्तथा॥ भूतोष्टादशनाडीभिर्दूषयत्य

त्तरां तिथिं॥ तथा च लघुमाधवे॥ पूर्वविद्धैव सावित्रीव्रते पंचदशी तिथिः॥ उभयव्या
पिनी दर्शपौर्णमासी तु यामिका॥ मध्याह्नव्यापिनी ग्राह्या उपोष्या विद्धुतत्परैः॥
नाड्योष्टादश भूतस्य मुश्चेदेतत्सरे हरि॥ व्रतांतराणि सर्वाणि परेहन्येव सवदे
ति॥ पूर्वेद्युरष्टादशनाडीपरिमिता च चतुर्दशी विद्यते॥ तत्र सावित्रीव्रतमपि परेद्यु
रेव कर्त्तव्यं॥ तत्र पौर्णिमा परेद्युः चतुर्दशी घटिपरिमितास्ततो द्वादशघटी मि
तास्ततस्तथापि अष्टादशनाडीपरिमिता चतुर्दशीयुक्तपौर्णिमास्यस्त्वपरवि
द्धायां पौर्णिमायां वटसावित्रीव्रतं कार्यं॥ अन्यथा पूर्वेद्युरेव॥ ॥इति ज्येष्ठपौर्णि
मायां वटसावित्रीव्रतं॥ चैत्रशुक्लपौर्णिमायां दमनपूजादौ परविद्धा पौर्णिव्यापि
नी ग्राह्या॥ श्रावणपौर्णिमा उपाकर्मणि संगवस्पृक् श्रवणनक्षत्रे उपाकर्म का
र्यं॥ तथा चोक्तं दीपिकाविवरणे॥ पर्वण्यौदयिकी कुर्युर्ग्रहसंक्रांतिवर्जिते॥
तथा च ज्योतिर्निबंधे॥ श्रावणी पौर्णिमासी च संगवस्पर्शिनी यदा भवेत्॥ तदौदयि
की ग्राह्या नान्यदौदयिका क्वचित्॥ ग्रहसंक्रांतिवर्जिता रहिता श्रुतिपर्वपरा
क्रमात्॥ परविद्धा उपादेया ऋग्यजुःसामशाखिभिः॥ यस्मिन्दिने गतमध्यरात्रा

१०

दारभ्यएषमध्यरात्रादर्वाक्संक्रांतिर्वास्यात्॥तद्दिनेउपाकर्मोत्सर्जनेनका
र्ये॥तत्रस्मृतिः॥अर्धरात्रादधस्ताच्चेत्संक्रांतिर्ग्रहणंयदि॥उपाकर्मन
कर्त्तव्यंपरतश्चेत्परेहनि॥अध्यायानामुपाकर्मश्रावण्यांश्रवणेथवा॥तन्मा
सेहस्तयुक्तायांपंचम्यांवातदिष्यते॥इतियाज्ञवल्क्यः॥एवंग्रहसंक्रांतिरहित
रहितऔदयिकसंगवस्पृक्परविद्धपौर्णिमाश्रावणीयजुर्वेदिभिरुपाकर्मणि
ग्राह्येतिसिद्धं॥श्रावणीपौर्णिमाप्रशस्त्यभावेभाद्रपदीपौर्णिमाप्रशस्ताग्राह्या॥
अस्याःप्रशस्त्याभावेआषाढीपौर्णिमाग्राह्यायाजुषैः॥नोत्तराषाढयायुक्ता
प्रतिपन्मिश्रितापिवेतिश्रवणेविशेषः॥यदाहबोधायनः॥सायाह्नात्रिमुहूर्त्ता
स्याकुश्रवणःप्रतिपद्युतः॥प्रतिपन्मिलितोह्नेयोवह्वृचैःपरिवर्जयेत्॥त्रिमुहूर्त्तोदया
दूर्ध्वमाषाढविद्यतेयदि॥श्रवणेचपरित्याज्यंबह्वृचैर्ब्राह्मणोत्तमैः॥उत्तराषा
ढायाविद्धाप्रतिपन्मिश्रितेपिवा॥श्रवणेश्रवणंकर्मोहूतीयेश्रवणोत्तवा॥ए
वंश्रावणशुक्लपक्षेग्रहसंक्रांतिरहितऔदयिकसंगवस्पृक्परविद्धश्रवणोकु

ग्वेदिभिरुपाकर्मकार्यं॥श्रवणप्रशस्त्याभावेभाद्रपदेश्रवणेकार्यं॥श्रवणप्रशस्त्या
भावेतन्मासिहस्तयुक्तायांपंचम्यांकार्यं॥पंचमीप्रशस्त्याभावेभाद्रपदेश्रवणेकार्यं॥श्र
वणाभावेहस्तपंचमी॥अस्याअभावेआषाढेवाकार्यं॥प्रथमोपाकर्मणिगुरुशुक्रास्तबा
ल्यवृद्धत्वंवर्ज्यं॥इति॥उपाकर्मणिनिर्णयः॥इयमेवदेवमनुष्याणांपवित्रारोपणेपरेव॥
सागशीर्षफलादिक्षेपणेसायंकालव्यापिनीग्राह्या॥इतिश्रावणपौर्णिमा॥आश्विनपौर्णि
मायांपर्वप्रतिपदोपराह्णेसंधिपक्षेआग्रयणस्थालीपाकंकृत्वापरेद्युर्नित्यस्थालीपाकः॥मंग
वादूर्ध्वमध्याह्नेसंधिपक्षेनित्यस्थालीपाकंकृत्वाआग्रयणस्थालीपाकःकार्यः॥अपराह्णेसा
यंपदिसर्वसमाप्यतेउपोष्यतस्मिन्नहनिश्वोभूतेयागइष्यते॥संधिर्यद्यपराह्णेस्याद्यागं
प्रातःपरेहनि॥कुर्वाणःप्रतिपद्भागेचतुर्थेपिनदुष्यति॥एतादृशेविषयेपौर्णिमास्यां
त्सद्यस्कालपक्षेआग्रयणेष्टिंकृत्वापश्चान्नित्येष्टिःकार्या॥ततोप्यधस्तात्संधिपक्षेपू
र्वेद्युर्नित्येष्टिमन्वाधानासंयोगेवआग्रयणादिकंकार्यं॥अत्रद्वैधाविभागोद्भयः॥तिथेःप

रस्या अर्धं षड्घटिकायास्तरूनास्तथाप्यधिकास्तता सांत्रार्धं वियोज्यंच।
तथाप्रयोज्यं ह्रासेच वृद्धेप्रथमेदिने च तत्॥ आग्रयणेष्टिं कृत्वा ब्राह्मणतर्पणा
दिकं प्रतिपद्यपि कार्यं॥ पर्वणोयश्चतुर्थांशस्तत्राद्याः प्रतिपदस्त्रयः॥ यागका
लः सविज्ञेयः प्रातरुक्तोमनीषिभिः॥ इति नित्यस्थालीपाकाग्रयणस्थालीपाकनि
र्णयः॥ ॥कार्त्तिकपौर्णिमादीपदानादौप्रदोषकालव्यापिनीग्राह्या॥ तदभावे पूर्वा
ग्राह्या॥ ॥अथफाल्गुनपौर्णिमायांहोलिकानिर्णयः॥ ॥भूतविद्धापौर्णिमा
स्यांप्रज्वलेद्धोलिकान्नरः॥ नंदाराकायुताभस्मवंदने सर्वमंगला॥ होलीसनंदारा
कायां यद्दृष्ट्वाप्रज्वलेत्तिये॥ सर्वंतत्रविनश्यंति द्वितीयाभस्मवंदनात्॥ होलीभद्रामु
मुखेदीप्ताः नगरग्रामदाहकः॥ तस्माद्भद्रामुखंत्याज्यंहोलाप्रज्वलने बुधैः॥ प्रति
प्रज्वलनेवह्नौद्वितीयाभस्मवंदने॥ तत्रभंगोनरेंद्राणांतद्राष्ट्रं च विनश्यति॥ ॥तपस्य
पौर्णिमास्यां तु भद्रांते होलिकोत्सवः॥ निवर्त्तवाराहोल्का बालान्संपीडयस्ततः॥ भद्रादौ